# Raghuvansha by Kalidas Chapter 5

# રઘુવંશં સર્ગઃ ૫ કાલિદાસકૃતમ્

## Document Information

Text title : raghuvansha5

File name : raghuvansha5.itx

Category : major_works, kAlidAsa

Location : doc_z_misc_major_works

Author : kalidasa

Transliterated by : Arvind Kolhatkar akolhatkar at rogers.com

Proofread by : Arvind Kolhatkar akolhatkar at rogers.com

Latest update : August 28, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# રઘુવંશં સર્ગઃ ૫ કાલિદાસકૃતમ્

તમધ્વરે વિશ્વજિતિ ક્ષિતીશં નિઃશેષવિશ્રાણિતકોશજાતમ્ ।
ઉત્પાતવિદ્યો ગુરુદક્ષિણાર્થી કૌત્સઃ પ્રપેદે વરતન્તુશિષ્યઃ ॥ ૫-૧॥

સ મૃણ્મયે વીતહિરણ્મયત્વાત્પાત્રે નિધાયાર્ઘ્યમનર્ઘશીલઃ ।
શ્રુતપ્રકાશં યશસા પ્રકાશઃ પ્રત્યુજ્જગામાતિથિમાતિથેયઃ ॥ ૫-૨॥

તમર્ચયિત્વા વિધિવદ્વિધિજ્ઞસ્તપોધનં માનધનાગ્રયાયી ।
વિશાંપતિર્વિષ્ટરભાજમારાત્કૃતાઞ્જલિઃ કૃત્યવિદિત્યુવાચ ॥ ૫-૩॥

અપ્યગ્રણીર્મન્ત્રકૃતામૃષીણાં કુશાગ્રબુદ્ધે કુશલી ગુરુસ્તે ।
યતસ્ત્વયા જ્ઞાનમશેષમાપ્તં લોકેન ચૈતન્યમિવોષ્ણરશ્મેઃ ॥ ૫-૪॥

કાયેન વાચા મનસાઓઇ શશ્વદ્યત્સંભૃતં વાસવધૈર્યલોડપિ ।
આપાદ્યતે ન વ્યયમન્તરાયૈઃ કચ્ચિન્મહર્ષેસ્ત્રિવિધં તપસ્તત્ ॥ ૫-૫॥

આધારબન્ધપ્રમુખૈઃ પ્રયત્નૈઃ સંવર્ધિતાનાં સુતનિર્વિશેષમ્ ।
કચ્ચિન્ન વાય્વાદિરુપપ્લવો વઃ શ્રમચ્છિદામાશ્રમપાદપાનામ્ ॥ ૫-૬॥

ક્રિયાનિમિત્તેશ્વપિ વત્સલત્વાદભગ્નકામા મુનિભિઃ કુશેષુ ।
તદઙ્કશય્યાચ્યુતનાભિનાલા કચ્ચિન્મૃગીણામનઘા પ્રસૂતિઃ ॥ ૫-૭॥

નિર્વત્યતે યૈર્નિયમાભિષેકો યેભ્યો નિવાપાઞ્જલયઃ પિતૃણામ્ ।
તાન્યુઞ્છષષ્ઠાઙ્કિતસૈકતાનિ શિવાનિ વસ્તીર્થજલાનિ કચ્ચિત્ ॥ ૫-૮॥

નીવારપાકાદિ કડંગરીયૈરામૃશ્યતે જાનપદૈર્ન કચ્ચિત્ ।
કાલોપપન્નાતિથિકલ્પ્યભાગં વન્યં શરીરસ્થિતિસાધનં વઃ ॥ ૫-૯॥

અપિ પ્રસન્નેન મહર્ષિણા ત્વં સમ્યગ્વિનીયાનુમતો ગૃહાય ।
કાલો હ્યયં સંક્રમિતું દ્વિતીયં સર્વોપકારક્ષમમાશ્રમં તે ॥ ૫-૧૦॥

તવાર્હતો નાભિગમેન તૃપ્તં મનો નિયોગક્રિયયોત્સુકં મે ।
અપ્યાજ્ઞયા શાસિતુરાત્મના વા પ્રાપ્તોડસિ સંભાવયિતું વનાન્મામ્ ॥ ૫-૧૧॥

ઇત્યર્ઘ્યપાત્રાનુમિતવ્યયસ્ય રઘોરુદારામપિ ગાં નિશમ્ય ।
સ્વાર્થોપપત્તિં પ્રતિ દુર્બલાશસ્તમિત્યવોચદ્વરતન્તુશિષ્યઃ ॥ ૫-૧૨॥

સર્વત્ર નો વાર્તમવેહિ રાજન્નાથે કુતસ્ત્વય્યશુભં પ્રજાનામ્ ।
સૂર્યે તપત્યાવરણાય દૃષ્ટેઃ કલ્પેત લોકસ્ય કથં તમિસ્રા ॥ ૫-૧૩॥

ભક્તિઃ પ્રતીક્ષ્યેષુ કુલોચિતા તે પૂર્વાન્મહાભાગ તયાતિશેષે ।
વ્યતીતકાલસ્ત્વહમભ્યુપેતસ્ત્વામર્થિભાવાદિતિ મે વિષાદઃ ॥ ૫-૧૪॥

શરીરમાત્રેણ નરેન્દ્ર તિષ્ઠન્નાભાસિ તીર્થપ્રતિપાદિતર્દ્ધિઃ ।
આરણ્યકોપાત્તફલપ્રસૂતિઃ સ્તમ્બેન નીવાર ઇવાવશિષ્ટઃ ॥ ૫-૧૫॥

સ્થાને ભવાનેકનરાધિપઃ સન્નકિંચનત્વં મખજં વ્યનક્તિ ।
પર્યાયપીતસ્ય સુરૈર્હિમાંશોઃ કલાક્ષયઃ શ્લાઘ્યતરો હિ વૃદ્ધેઃ ॥ ૫-૧૬॥

તદન્યતસ્તાવદનન્યકાર્યો ગુર્વર્થમાહર્તુમહં યતિષ્યે ।
સ્વસ્ત્યસ્તુ તે નિર્ગલિતામ્બુગર્ભં શરદ્ઘનં નાર્દતિ ચાતકોઽપિ ॥ ૫-૧૭॥

એતાવદુક્ત્વા પ્રતિયાતુકામં શિષ્યં મહર્ષેર્નૃપતિર્નિષિધ્ય ।
કિં વસ્તુ વિદ્વન્ગુરવે પ્રદેયં ત્વયા કિયદ્વેતિ તમન્વયુઙ્ક્ત ॥ ૫-૧૮॥

તતો યથાવદ્વિહિતાધ્વરાય તસ્મૈ સ્મયાવેશવિવર્જિતાય ।
વર્ણાશ્રમાણાં ગુરવે સ વર્ણી વિચક્ષણઃ પ્રસ્તુતમાચચક્ષે ॥ ૫-૧૯॥

સમાપ્તવિદ્યેન મયા મહર્ષિર્વિજ્ઞાપિતોઽભૂદ્ગુરુદક્ષિણાયૈ ।
સ મે ચિરાયાસ્ખલિતોપચારાં તાં ભક્તિમેવાગણયત્પુરસ્તાત્ ॥ ૫-૨૦॥

નિર્બન્ધસંજાતરુષાર્થકાર્શ્યમચિન્તયિત્વા ગુરુણાહમુક્તઃ ।
વિત્તસ્ય વિદ્યાપરિસંખ્યયા મે કોટીશ્ચતસ્રો દશ ચાહરેતિ ॥ ૫-૨૧॥

સોઽહં સપર્યાવિધિભાજનેન મત્વા ભવન્તં પ્રભુશબ્દશેષમ્ ।
અભ્યુત્સહે સંપ્રતિ નોપરોદ્ધુમલ્પેતરત્વાચ્છ્રુતનિષ્ક્રયસ્ય ॥ ૫-૨૨॥

ઇત્થં દ્વિજેન દ્વિજરાજકાન્તિરાવેદિતો વેદવિદાં વરેણ ।
એનોનિવૃત્તેન્દ્રિયવૃત્તિરેનં જગાદ ભૂયો જગદેકનાથઃ ॥ ૫-૨૩॥

ગુર્વર્થમર્થી શ્રુતપારદૃશ્વા રઘોઃ સકાશાદનવાપ્ય કામમ્ ।
ગતો વદાન્યાન્તરમિત્યયં મે મા ભૂત્પરીવાદનવાવતારઃ ॥ ૫-૨૪॥

સ ત્વં પ્રશસ્તે મહિતે મદીયે વસંશ્ચતુર્થોઽગ્નિરિવાગ્નિગારે ।
દ્વિત્રાણ્યહાન્યર્હસિ સોઢુમર્હન્ યાવદ્યતે સાધયિતું ત્વદર્થમ્ ॥ ૫-૨૫॥

તથેતિ તસ્યાવિતથં પ્રતીતઃ પ્રત્યગ્રહીત્સંગરમગ્રજન્મા ।
ગામાત્તસારાં રઘુરપ્યવેક્ષ્ય નિષ્ક્રષ્ટુમર્થં ચકમે કુબેરાત્ ॥ ૫-૨૬॥

વસિષ્ઠમન્ત્રોક્ષણજાત્પ્રભાવાદુદન્વદાકાશમહીધરેષુ ।
મરુત્સખસ્યેવ બલાહકસ્ય ગતિર્વિજઘ્ને ન હિ તદ્રથસ્ય ॥ ૫-૨૭॥

અથાધિશિશ્યે પ્રયતઃ પ્રદોષે રથં રઘુઃ કલ્પિતશસ્ત્રગર્ભમ્ ।
સામન્તસંભાવનયૈવ ધીરઃ કૈલાસનાથં તરસા જિગીષુઃ ॥ ૫-૨૮॥

પ્રાતઃ પ્રયાણાભિમુખાય તસ્મૈ સવિસ્મયાઃ કોષગૃહે નિયુક્તાઃ ।
હિરણ્મયીં કોષગૃહસ્ય મધ્યે વૃષ્ટિં શશંસુઃ પતિતાં નભસ્તઃ ॥ ૫-૨૯॥

સ ભૂપતિર્ભાસુરહેમરાશિં લબ્ધં કુબેરાદભિયાસ્યમાનાત્ ।
દિદેશ કૌત્સાય સમસ્તમેવ પાદં સુમેરોરિવ વજ્રભિન્નમ્ ॥ ૫-૩૦॥

જનસ્ય સાકેતનિવાસિનસ્તૌ દ્વાવપ્યભૂતાનભિનન્દ્યસત્ત્વૌ ।
ગુરુપ્રદેયાધિકનિઃસ્પૃહોઽર્થી નૃપોઽર્થિકામાદધિકપ્રદશ્ચ ॥ ૫-૩૧॥

અથોષ્ટ્રવામીશતવાહિતાર્થં પ્રજેશ્વરં પ્રીતમના મહર્ષિઃ ।
સ્પૃશન્કરેણાનતપૂર્વકાયં સંપ્રસ્થિતો વાચમુવાચ કૌત્સઃ ॥ ૫-૩૨॥

કિમત્ર ચિત્રં યદિ કામસૂર્ભૂર્વૃત્તે સ્થિતસ્યાધિપતેઃ પ્રજાનામ્ ।
અચિન્તનીયસ્તુ તવ પ્રભાવો મનીષિતં દ્યૌરપિ યેન દુગ્ધા ॥ ૫-૩૩॥

આશાસ્યમન્યત્પુનરુક્તભૂતં શ્રેયાંસિ સર્વાણ્યધિજગ્મુષસ્તે ।
પુત્રં લભસ્વાત્મગુણાનુરૂપં ભવન્તમીડ્યં ભવતઃ પિતેવ ॥ ૫-૩૪॥

ઇત્થં પ્રયુજ્યાશિષમગ્રજન્મા રાજ્ઞે પ્રતીયાય ગુરોઃ સકાશમ્ ।
રાજાપિ લેભે સુતમાશુ તસ્માદાલોકમર્કાદિવ જીવલોકઃ ॥ ૫-૩૫॥

બ્રાહ્મે મુહૂર્તે કિલ તસ્ય દેવી કુમારકલ્પં સુષુવે કુમારમ્ ।
અતઃ પિતા બ્રહ્મણ એવ નામ્ના તમાત્મજન્માનમજં ચકાર ॥ ૫-૩૬॥

રૂપં તદોજસ્વિ તદેવ વીર્યં તદેવ નૈસર્ગિકમુન્નતત્વમ્ ।
ન કારણાત્સ્વાદ્બિભિદે કુમારઃ પ્રવર્તિતો દીપ ઇવ પ્રદીપાત્ ॥ ૫-૩૭॥

ઉત્પાતવિદ્યં વિધિવદ્ગુરુભ્યસ્તં યૌવનોદ્ભેદવિશેષકાન્તમ્ ।
શ્રીઃ સાભિલાષાપિ ગુરોરનુજ્ઞાં ધીરેવ કન્યા પિતુરાચકાઙ્ક્ષ ॥ ૫-૩૮॥

અથેશ્વરેણ ક્રથકૈશિકાનાં સ્વયંવરાર્થં સ્વસુરિન્દુમત્યાઃ ।

આપ્તઃ કુમારાનયનોત્સુકેન ભોજેન દૂતો રઘવે વિસૃષ્ટઃ ॥ ૫-૩૯॥

તં શ્લાઘ્યસંબન્ધમસૌ વિચિન્ત્ય દારક્રિયાયોગ્યદશશ્ચ પુત્રમ્ ।
પ્રસ્થાપયામાસ સસૈન્યમેનમૃદ્ધાં વિદર્ભાધિપરાજધાનીમ્ ॥ ૫-૪૦॥

તસ્યોપકાર્યારચિતોપચારા વન્યેતરા જાનપદોપદાભિઃ ।
માર્ગે નિવાસા મનુજેન્દ્રસૂનોર્બભૂવુરુદ્યાનવિહારકલ્પાઃ ॥ ૫-૪૧॥

સ નર્મદારોધસિ સીકરાર્દ્રૈર્મરુદ્ભિરાનર્તિતનક્તમાલે ।
નિવેશયામાસ વિલઙ્ઘિતાધ્વા ક્લાન્તં રજોધૂસરકેતુ સૈન્યમ્ ॥ ૫-૪૨॥

અથોપરિષ્ટાદ્ભ્રમરૈર્ભ્રમદ્ભિઃ પ્રાક્સૂચિતાન્તઃસલિલપ્રવેશઃ ।
નિર્ધૌતદાનામલગણ્ડભિત્તિર્વન્યઃ સરિત્તો ગજ ઉન્મમજ્જ ॥ ૫-૪૩॥

નિઃશેષવિક્ષાલિતધાતુનાપિ વપ્રક્રિયામૃક્ષવતસ્તટેષુ ।
નીલોર્ધ્વરેખાશબલેન શંસન્દન્તદ્વયેનાશ્મવિકુણ્ઠિતેન ॥ ૫-૪૪॥

સંહારવિક્ષેપલઘુક્રિયેણ હસ્તેન તીરાભિમુખઃ સશબ્દમ્ ।
બભૌ સ ભિન્દન્બૃહતસ્તરંગાન્વાર્યર્ગલાભઙ્ગ ઇવ પ્રવૃત્તઃ ॥ ૫-૪૫॥

શૈલોપમઃ શૈવલમઞ્જરીણાં જાલાનિ કર્ષન્નુરસા સ પશ્ચાત્ ।
પૂર્વં તદુત્પીડિતવારિરાશિઃ સરિત્પ્રવાહસ્તટમુત્સસર્પ ॥ ૫-૪૬॥

તસ્યૈકનાગસ્ય કપોલભિત્ત્યોર્જલાવગાહક્ષણમેકશાન્તા ।
વન્યેતરાનેકપદર્શનેન પુનર્દિદીપે મદદુર્દિનશ્રીઃ ॥ ૫-૪૭॥

સપ્તચ્છદક્ષીરકટુપ્રવાહમસહ્યમાઘ્રાય મદં તદીયમ્ ।
વિલઙ્ઘિતાધોરણતીવ્રયત્નાઃ સેનાગજેન્દ્રા વિમુખા બભૂવુઃ ॥ ૫-૪૮॥

સ ચ્છિન્નબન્ધદ્રુતયુગ્યશૂન્યં ભગ્નાક્ષપર્યસ્તરથં ક્ષણેન ।
રામાપરિત્રાણવિહસ્તયોધં સેનનિવેશં તુમુલં ચકાર ॥ ૫-૪૯॥

તમાપતન્તં નૃપતેરવધ્યો વન્યઃ કરીતિ શ્રુતવાન્કુમારઃ ।
નિર્વર્તયિષ્યન્વિશિખેન કુમ્ભે જઘાન નાત્યાયતકૃષ્ટશાર્ઙ્ગઃ ॥ ૫-૫૦॥

સ વિદ્ધમાત્રઃ કિલ નાગરૂપમુત્સૃજ્ય તદ્વિસ્મિતસૈન્યદૃષ્ટઃ ।
સ્ફુરત્પ્રભામણ્ડલમધ્યવર્તિ કાન્તં વપુર્વ્યોમચરઃ પ્રપેદે ॥ ૫-૫૧॥

અથ પ્રભાવોપનતૈઃ કુમારં કલ્પદ્રુમોત્થૈરવકીર્ય પુષ્પૈઃ ।
ઉવાચ વાગ્મી દશનપ્રભાભિઃ સંવર્ધિતોરઃસ્થલતારહારઃ ॥ ૫-૫૨॥

મતઙ્ગશાપાદવલેપમૂલાદવાપ્તવાનસ્મિ મતઙ્ગજત્વમ્ ।
અવેહિ ગન્ધર્વપતેસ્તનૂજં પ્રિયંવદં માં પ્રિયદર્શનસ્ય ॥ ૫-૫૩॥

સ ચાનુનીતઃ પ્રણતેન પશ્ચાન્મયા મહર્ષિર્મૃદુતામગચ્છત્ ।
ઉષ્ણત્વમગ્ન્યાતપસંપ્રયોગાચ્છૈત્યં હિ યત્સા પ્રકૃતિર્જલસ્ય ॥ ૫-૫૪॥

ઇક્ષ્વાકુવંશપ્રભવો યદા તે ભેત્સ્યત્યજઃ કુમ્ભમયોમુખેન ।
સંયોક્ષ્યસે સ્વેન વપુર્મહિમ્ના તદેત્યવોચત્સ તપોનિધિર્મામ્ ॥ ૫-૫૫॥

સંમોચિતઃ સત્ત્વવતા ત્વયાહં શાપાચ્ચિરપ્રાર્થિતદર્શનેન ।
પ્રતિપ્રિયં ચેદ્ભવતો ન કુર્યાં વૃથા હિ મે સ્યાત્સ્વપદોપલબ્ધિઃ ॥ ૫-૫૬॥

સંમોહનં નામ સખે મમાસ્ત્રં પ્રયોગસંહારવિભક્તમન્ત્રમ્ ।
ગાન્ધર્વમાદત્સ્વ યતઃ પ્રયોક્તુર્ન ચારિહિંસા વિજયશ્ચ હસ્તે ॥ ૫-૫૭॥

અલં હ્રિયા માં પ્રતિ યન્મુહૂર્તં દયાપરોઽભૂઃ પ્રહરન્નપિ ત્વમ્ ।
તસ્માદુપચ્છન્દયતિ પ્રયોજ્યં મયિ ત્વયા ન પ્રતિષેધરૌક્ષ્યમ્ ॥ ૫-૫૮॥

તથેત્યુપસ્પૃશ્ય પયઃ પવિત્રં સોમોદ્ભવાયાઃ સરિતો નૃસોમઃ ।
ઉદઙ્મુખઃ સોઽસ્ત્રવિદસ્ત્રમન્ત્રં જગ્રાહ તસ્માન્નિગૃહીતશાપાત્ ॥ ૫-૫૯॥

એવં તયોરધ્વનિ દૈવયોગાદાસેદુષોઃ સખ્યમચિન્ત્યહેતુ ।
એકો યયૌ ચૈત્રરથપ્રદેશાન્સૌરાજ્યરમ્યાનપરો વિદર્ભાન્ ॥ ૫-૬૦॥

તં તસ્થિવાંસં નગરોપકણ્ઠે તદાગમારૂઢગુરુપ્રહર્ષઃ ।
પ્રત્યુજ્જગામ ક્રથકૈશિકેન્દ્રશ્ચન્દ્રં પ્રવૃદ્ધોર્મિરિવોર્મિમાલી ॥ ૫-૬૧॥

પ્રવેશ્ય ચૈનં પુનરગ્રયાયી નીચૈસ્તથોપાચરદર્પિતશ્રીઃ ।
મેને યથા તત્ર જનઃ સમેતો વૈદર્ભમાગન્તુમજં ગૃહેશમ્ ॥ ૫-૬૨॥

તસ્યાધિકારપુરુષૈઃ પ્રણતૈઃ પ્રદિષ્ટાં
પ્રાગ્દ્વારવેદિવિનિવેશિતપૂર્ણકુમ્ભામ્।
રમ્યાં રઘુપ્રતિનિધિઃ સ નવોપકાર્યાં
બાલ્યાત્પરામિવ દશાં મદનોઽધ્યુવાસ ॥ ૫-૬૩॥

તત્ર સ્વયંવરસમાહૃતરાજલોકં
કન્યાલલામ કમનીયમજસ્ય લિપ્સોઃ।
ભાવાવબોધકલુષા દયિતેવ રાત્રૌ
નિદ્રા ચિરેણ નયનાભિમુખી બભૂવ ॥ ૫-૬૪॥

તં કર્ણભૂષણનિપીડિતપીવરાંસં
શય્યોત્તરચ્છદવિમર્દકૃશાઙ્ગરાગમ્ ।
સૂતાત્મજાઃ સવયસઃ પ્રથિતપ્રબોધં
પ્રાબોધયન્નુષસિ વાગ્ભિરુદારવાચઃ ॥ ૫-૬૫॥

રાત્રિર્ગતા મતિમતાં વર મુઞ્ચ શય્યાં
ધાત્રા દ્વિધૈવ નનુ ધૂર્જગતો વિભક્તા ।
તામેકતસ્તવ બિભર્તિ ગુરુર્વિનિદ્ર-
સ્તસ્યા ભવાનપરધુર્યપદાવલમ્બી ॥ ૫-૬૬॥

નિદ્રાવશેન ભવતાપ્યનવેક્ષમાણા
પર્યુત્સુકત્વમબલા નિશિ ખણ્ડિતેવ ।
લક્ષ્મીર્વિનોદયતિ યેન દિગન્તલમ્બી
સોઽપિ ત્વદાનનરુચિં વિજહાતિ ચન્દ્રઃ ॥ ૫-૬૭॥

તદ્વલ્ગુના યુગપદુન્મિષિતેન તાવત્-
સદ્યઃ પરસ્પરતુલામધિરોહતાં દ્વે ।
પ્રસ્પન્દમાનપરુષેતરતારમન્ત-
શ્ચક્ષુસ્તવ પ્રચલિતભ્રમરં ચ પદ્મમ્ ॥ ૫-૬૮॥

વૃન્તાચ્છ્લથં હરતિ પુષ્પમનોકહાનાં
સંસૃજ્યતે સરસિજૈરરુણાંશુભિન્નૈઃ ।
સ્વાભાવિકં પરગુણેન વિભાતવાયુઃ
સૌરભ્યમીપ્સુરિવ તે મુખમારુતસ્ય ॥ ૫-૬૯॥

તામ્રોદરેષુ પતિતં તરુપલ્લવેષુ
નિર્ધૌતહારગુલિકાવિશદં હિમામ્ભઃ
આભાતિ લબ્ધપરભાગતયાધરોષ્ઠે
લીલાસ્મિતં સદશનાર્ચિરિવ ત્વદીયમ્ ॥ ૫-૭૦॥

યાવત્પ્રતાપનિધિરાક્રમતે ન ભાનુ-
રહ્નાય તાવદરુણેન તમો નિરસ્તમ્ ।
આયોધનાગ્રસરતાં ત્વયિ વીર યાતે
કિં વા રિપૂંસ્તવ ગુરુઃ સ્વયમુચ્છિનત્તિ ॥ ૫-૭૧॥

શય્યાં જહત્યુભયપક્ષવિનીતનિદ્રાઃ
સ્તમ્બેરમા મુખરશૃઙ્ખલકર્ષિણસ્તે ।

યેષાં વિભાતિ તરુણારુણરાગયોગા-
દ્ભિન્નાદ્રિગૈરિકતટા ઇવ દન્તકોશાઃ ॥ ૫-૭૨॥

દીર્ઘેષ્વમી નિયમિતાઃ પટમણ્ડપેષુ
નિદ્રાં વિહાય વનજાક્ષ વનાયુદેશ્યાઃ ।
વક્ત્રોષ્મણા મલિનયન્તિ પુરોગતાનિ
લેહ્યાનિ સૈન્ધવશિલાશકલાનિ વાહાઃ ॥ ૫-૭૩॥

ભવતિ વિરલભક્તિર્મ્લાનપુષ્પોપહારઃ
સ્વકિરણપરિવેષોદ્ભેદશૂન્યાઃ પ્રદીપાઃ ।
અયમપિ ચ ગિરં નસ્ત્વત્પ્રબોધપ્રયુક્તા-
મનુવદતિ શુકસ્તે મઞ્જુવાક્પઞ્જરસ્થઃ ॥ ૫-૭૪॥

ઇતિ વિરચિતવાગ્ભિર્બન્દિપુત્રૈઃ કુમારઃ
સપદિ વિગતનિદ્રસ્તલ્પમુજ્ઝાંચકાર ।
મદપટુનિનદદ્ભિર્બોધિતો રાજહંસૈઃ
સુરગજ ઇવ ગાઙ્ગં સૈકતં સુપ્રતીકઃ ॥ ૫-૭૫॥

અથ વિધિમવસાય્ય શાસ્ત્રદૃષ્ટં
દિવસમુખોચિતમઞ્ચિતાક્ષિપક્ષ્મા ।
કુશલવિરચિતાનુકૂલવેશઃ
ક્ષિતિપસમાજમગાત્સ્વયંવરસ્થમ્ ॥ ૫-૭૬॥

ઇતિ શ્રીકાલિદાસકૃતે રઘુવંશે મહાકાવ્યે પઞ્ચમઃ સર્ગઃ ॥

Encoded and Proofread by Arvind Kolhatkar akolhatkar at rogers.com

*Raghuvansha by Kalidas Chapter 5*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*